नारद उवाच ।
कथं सरस्वती देवी गङ्गाशापेन भारते ।
कलया कलहेनैव बभूव पुण्यदा सरित् ॥
नारायण उवाच ।
शृणु नारद वक्ष्यामि कथामेनां पुरातनीम् ।
यस्याः श्रवणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
लक्ष्मीः सरस्वती गङ्गा तिस्रो भार्य्या हरेरपि ।
प्रेम्णा समास्तास्तिष्ठन्ति सन्ततं हरिसन्निधौ ॥
चकार सैकदा गङ्गा विष्णोर्म्मुखनिरीक्षणम् ॥
सस्मिता च सकामा च सकटाक्षं पुनः पुनः ।
विभुर्ज्जहास तद्वक्तुं निरीक्ष्य च क्षणं मुदा ।
क्षमां चकार तद्दृष्ट्वा लक्ष्मीर्नैव सरस्वती ॥
बोधयामास तां पद्मा सत्त्वरूपा च सस्मिता ।
क्रोधाविष्टा च सा वाणी न च शान्ता बभूव ह ॥
उवाच गङ्गां भर्त्तारं रक्तास्या रक्तलोचना ।
कम्पिता कोपवेगेन शश्वत्प्रस्फुरिताधरा ॥
सरस्वत्युवाच ।
सर्व्वत्र समताबुद्धिः सद्भर्त्तुः कामिनीं प्रति ।
धर्म्मिष्ठस्य वरिष्ठस्य विपरीता खलस्य च ॥
ज्ञातं सौभाग्यमधिकं गङ्गायां ते गदाधर ।
कमलायाश्च तत्तुल्यं न च किञ्चिन्मयि प्रभो ॥
गङ्गायाः पद्मया सार्द्धं प्रीतिश्चास्ति सुसम्मता ।
क्षमां चकार तेनेदं विपरीतं हरिप्रिया ॥
किं जीवनेन मेऽत्रैव दुर्भगायाश्च साम्प्रतम् ।
निष्फलं जीवनं तस्या या पत्युः प्रेमवञ्चिता ॥
त्वां सर्व्वेशं सत्त्वरूपं ये वदन्ति मनीषिणः ।
ते च मूर्खा न वेदज्ञा न जानन्ति मतिं तव ॥
सरस्वतीवचः श्रुत्वा दृष्ट्वा तां कोपसंयुताम् ।
मनसा स समालोच्य प्रजगाम बहिःसभाम् ॥
गते नारायणे गङ्गामुवाच निर्भयं रुषा ।
वागधिष्ठातृदेवी सा वाक्यं श्रवणदुष्करम् ॥
हे निर्लज्जे हे सकामे स्वामिगर्व्वं करोषि किम् ।
अधिकं स्वामिसौभाग्यं विज्ञापयितुमिच्छसि ॥
मानचूर्णं करिष्यामि तवाद्य हरिसन्निधौ ।
किं करिष्यति ते कान्तो ममैव कान्तवल्लभे ॥
इत्येवमुक्त्वा गङ्गायाः केशं ग्रहीतुमुद्यता ।
वारयामास तां पद्मा मध्यदेशे स्थिता सती ॥
शशाप वाणी तां पद्मां महाकोपवती सती ।
वृक्षरूपा सरिद्रूपा भविष्यसि न संशयः ॥
अनुन्नताश्च तां दृष्ट्वा कोपप्रस्फुरिताधरा ।
उवाच गङ्गा तां देवीं पद्माश्च रक्तलोचना ॥
गङ्गोवाच ।
त्वमुत्सृज महोग्राश्च पद्मे किं मे करिष्यति ।
वागदुष्टा वागधिष्ठात्री देवीयं कलहप्रिया ॥
इत्थं वसुक्त्वा सा देवी वाण्यै शापं ददाविति ।
सरित्स्वरूपा भवतु सा या त्वाञ्च शशाप ह ॥
अधोमर्त्यं सा प्रयातु सन्ति यत्रैव पापिनः ।
कलौ तेषाञ्च पापांशं लभिष्यसि न संशयः ॥
इत्येवं वचनं श्रुत्वा तां शशाप सरस्वती ।
त्वमेव यास्यसि महीं पापिपापं लभिष्यसि ॥
एतस्मिन्नन्तरे तत्र भगवानाजगाम ह ।
चतुर्भुजश्चतुर्भिश्च पार्षदैश्च चतुर्भुजैः ॥
सरस्वतीं करे धृत्वा वासयामास वक्षसि ।
बोधयामास सर्व्वज्ञः सर्व्वज्ञानं पुरातनम् ॥
श्रीनारायण उवाच ।
लक्ष्मि त्वं कलया गच्छ धर्म्मध्वजगृहं शुभे ।
अयोनिसम्भवा योनौ तस्य कन्या भविष्यसि ॥
तत्रैव दैवदोषेण वृक्षत्वञ्च लभिष्यसि ।
मदंशस्यासुरस्यैव शङ्खचूडस्य कामिनी ॥
भूत्वा पश्चाच्च मत्पत्नी भविष्यसि न संशयः ।
त्रैलोक्यपावनी नाम्ना तुलसीति च भारते ॥
कलया च सरिद्भूत्वा शीघ्रं गच्छ वरानने ।
भारते भारतीशापात् नाम्ना पद्मावती भव ॥
गङ्गे यास्यसि पश्चात्त्वमंशेन विश्वपावनी ।
भारतं भारतीशापात् पापदाहाय पापिनाम् ॥
भगीरथस्य तपसा तेन नीता सुदुष्करात् ।
नाम्ना भागीरथी पूता भविष्यसि महीतले ॥
मदंशस्य समुद्रस्य जाया भव ममाज्ञया ।
मत्कलांशस्य तस्यैव शान्तनोश्च सुरेश्वरि ॥ * ॥
गङ्गाशापेन कलया भारतं गच्छ भारति ।
कलहस्य फलं भुङ्क्ष्व सपत्नीभ्यां सहाच्युते ॥
स्वयञ्च ब्रह्मसदनं ब्रह्मणः कामिनी भव ।
गङ्गा यातु शिवस्थानमत्र पद्मैव तिष्ठतु ॥
शान्ता च क्रोधरहिता मद्भक्ता सत्त्वरूपिणी ।
महासाध्वी महाभागा सुशीला धर्म्मचारिणी ॥
यदंशकलया सर्व्वा धर्म्मिष्ठाश्च पतिव्रताः ।
शान्तरूपाः सुशीलाश्च प्रतिविश्वेषु योषितः ॥
तिस्रो भार्य्यास्त्रिशालाश्च त्रयो भृत्याश्च
बान्धवाः ।
ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः ॥
गच्छ गङ्गे शिवस्थानं ब्रह्मस्थानं सरस्वती ।
अत्र तिष्ठतु मद्गेहे सुशीला कमलालया ॥
इत्युक्त्वा जगतां नाथो विरराम च नारद ।
अत्युच्चै रुरुदुर्देव्यः समालिङ्ग्य परस्परम् ॥
ताश्च सर्व्वाः समालोच्य क्रमेणोचुः सदीश्वरम् ।
कम्पिताः साश्रुनेत्राश्च शोकेन च भयेन च ॥
सरस्वत्युवाच ।
विदायं देहि मे नाथ दुष्टाया जन्मशोधनम् ।
सत्स्वामिना परित्यक्ता कुतो जीवन्ति काः
स्त्रियः ॥
देहत्यागं करिष्यामि योगेन भारते ध्रुवम् ।
अत्युच्छ्रितो निपतनं प्राप्नुमर्हति निश्चितम् ॥
गङ्गोवाच ।
अहं केनापराधेन त्वया त्यक्ता जगत्पते ।
देहत्यागं करिष्यामि निर्दोषाया वधं लभ ॥
निर्दोषां कामिनीं त्यागं करोति यो जनो भवे ।
स याति नरकं कल्पं किं ते सर्व्वेश्वरस्य वा ॥
महालक्ष्मीरुवाच ।
नाथ सत्त्वस्वरूपस्त्वं कोपः कथमहो तव ।
प्रसादं कुरु भार्य्ये द्वे सदीशस्य क्षमा वरम् ॥
भारतं भारतीशापात् यास्यामि कलया विभो ।
कतिकालं स्थितिस्तत्र कदा द्रक्ष्यामि ते पदम् ॥
दास्यन्ति पापिनः पापं मह्यं स्नानावगाहनात् ।
केन तेन विमुक्ताहमागमिष्यामि त्वत्पदम् ॥
कलया तुलसीरूपा धर्म्मध्वजसुता सती ।
भूत्वा कदा लभिष्यामि त्वत् पादाम्बुजमच्युत ॥
वृक्षरूपा भविष्यामि त्वदधिष्ठातृदेवता ।
मामुद्धरिष्यसि कदा तन्मे ब्रूहि कृपानिधे ॥
गङ्गा सरस्वतीशापात् यदि यास्यति भारतम् ।
सा केन मुक्ता पापाच्च कदा त्वां वा लभि-
ष्यति ॥
गङ्गाशापेन सा वाणी यदि यास्यति भारतम् ।
कदा शापाद्विनिर्मुच्य लभिष्यति पदं तव ॥
तां वाणीं ब्रह्मसदनं गङ्गां वा शिवमन्दिरम् ।
गन्तुं वदसि हे नाथ तत् क्षमस्व च ते वचः ॥
इत्युक्त्वा कमला कान्तपदं धृत्वा ननाम च ।
स्वकेशैर्वेष्टनं कृत्वा रुरोद च पुनः पुनः ॥
उवाच पद्मनाभस्तां पद्मां कृत्वा स्ववक्षसि ।
ईषद्धास्यप्रसन्नास्यो भक्तानुग्रहकातरः ॥
श्रीनारायण उवाच ।
त्वद्वाक्यमाचरिष्यामि स्ववाक्यञ्च सुरेश्वरि ।
शमताञ्च करिष्यामि शृणु तत्क्रममेव च ॥
भारती यातु कलया सरिद्रूपा च भारतम् ।
अर्द्धांशा ब्रह्मसदनं स्वयं तिष्ठतु मद्गृहे ॥
भगीरथेन नीता सा गङ्गा यास्यति भारतम् ।
पूतं कर्त्तुं त्रिभुवनं स्वयं तिष्ठतु मद्गृहे ॥
तत्रैव चन्द्रमौलेश्च मौलिं प्राप्स्यति दुर्लभम् ।
ततः स्वभावतः पूताप्यतिपूता भविष्यति ॥
कलांशांशेन त्वं गच्छ भारतं कमले भव ।
पद्मावती सरिद्रूपा तुलसी वृक्षरूपिणी ॥
कलेः पञ्चसहस्रे च गते वर्षे च मोक्षणम् ।
युष्माकं सरिताञ्चैव मद्गृहश्चागमिष्यति ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ६ । १—८६ ॥

सरस्वान्, [त्] पुं, (सरो नीरमस्त्यस्येति मतुप् । तसौ मत्वर्थे इति भत्वान्न पदकार्य्यम् ।) समुद्रः । इत्यमरः । १ । ९ । ० । १ ॥ नदः । रसिके, त्रि । इति मेदिनी ॥

सरा, स्त्री, (सरति गच्छतीति । सृ + अच् । टाप् ।) निर्झरः । इति भरतद्विरूपकोषः ॥ प्रसारिणी । इति राजनिर्घण्टः ॥

सरावः, पुं, (सरात् सरणात् अवतीति । अव रक्षणे + अच् ।) शरावः । इति भरतद्विरूपकोषः ॥

सरिः, पुं, स्त्री, (सरतीति । सृ + इन् ।) निर्झरः । इति हेमचन्द्रः ॥

सरिका, स्त्री, हिङ्गुपत्री । इति शब्दचन्द्रिका ॥ गमनकर्त्री च ॥

सरित्, स्त्री, (सरतीति । सृ गतौ + "हृसृरुहि-युषिभ्य इतिः ।" उणा० १ । ९६ । इति इतिः ।) नदी । इत्यमरः । १ । १० । २९ ॥ (यथा, देवीमाहात्म्ये ।
"सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥") सूत्रम् । इति शब्दमाला ॥ दुर्गा । यथा,—
"क्रिया कारणरूपत्वात् सरणाच्च सरिन्मता ।
सङ्गमाद्गमनाद्गङ्गा लोके देवी विभाव्यते ॥"
इति देवीपुराणे ४५ अध्यायः ॥